उद्दीपने यद्वचनं वचनाद्धास्यरोषकृत् ॥ * ॥
वाक्केलिर्हास्यसम्बन्धो द्वित्रिप्रत्युक्तितोभवेत् ॥
द्वित्र्युपलक्षणं यथा,—
भिक्षो मांसनिषेवणं प्रकुरुषे किन्तेन मद्यं विना
मद्यञ्चापि तव प्रियं प्रियमहो वाराङ्गनाभिः
सह ।
तासामर्थरुचिः कुतस्तव धनं द्यूतेन चौर्य्येण वा
चौर्य्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या
गतिः ॥
केचित् प्रक्रान्तवाक्यस्य साकाङ्क्षस्यैव निर्व्वृत्ति-
र्वाक्केलिरित्याहुः । अन्ये चानेकस्य प्रश्नस्यै-
कमुत्तरम् ॥ * ॥
अन्योन्यवाक्याधिक्योक्तिः स्पर्द्धयाधिबलं मतम् ॥
यथा, मम प्रभावत्यां वज्रनाभः ।
अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयिष्यामि भुवनद्वयमद्य वः ॥
प्रद्युम्नः । अरे रे असुरापसद अलमनेन बहु-
प्रलापेन मम खलु ।
अद्य प्रचण्डभुजदण्डसमर्पितोरु-
कोदण्डनिर्गलितकाण्डसमूहपातैः ।
आस्तां समस्तदितिजक्षतजोक्षितेयं
क्षौणी क्षणेन पिशिताशनशोभनीया ॥ * ॥
गण्डं प्रस्तुतसम्बन्धि भिन्नार्थं सत्वरं वचः ॥
यथा वेण्यां राजा ।
अध्यासितुं तव चिराज्जघनस्थलस्य
पर्य्याप्तमेव करभोरु ममोरुयुग्मम् ।
अनन्तरं प्रविश्य कञ्चुकी देव भग्नं भग्नमित्यादि ।
अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे सम्बन्धि
सम्बद्धम् ॥ * ॥
व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत् ॥
यथा छलितरामे सीता । जाद कल्लं क्खु उ
अज्झा एव गन्तव्वं तहिं सो राआ विणएण
पणमियव्वो । लवः । अथ किमावाभ्यां राजो-
पजीविभ्यां भवितव्यम् । सीता । जादसो
तुह्माणं पिदा । लवः । किमावयो रघुपतिः
पिता । सीता । साशङ्कं मा अण्णधा सङ्कधं
क्खु तुह्माणं स आलाओ एव पुहवीएत्ति ॥*॥
प्रहेलिकेव हास्येन युक्ता भवति नालिका ॥
संवरणकार्य्युत्तरं प्रहेलिका । यथा रत्नावल्याम् ।
सुसङ्गता सहि जस्स कदे तुमं आअदा सो
इधज्जेव चिट्ठदि सागरिआ कस्स कदे अहं
आअदा सुसंगं चित्तफलअस्स । अत्र त्वं राज्ञः
कृते आगतेत्यर्थः संवृतः ॥ * ॥
असत्प्रलापो यद्वाक्यमसम्बद्धं तथोत्तरम् ।
अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं
वचः ॥
तत्राद्यं यथा मम प्रभावत्याम् । प्रद्युम्नः सह-
कारवल्लीमवलोक्य सानन्दं अहो कथमिहैव ।
अलिकुलमञ्जुलकेशी
परिमलबहुला रसावहा तन्वी ।
किशलयपेशलपाणिः
कोकिलकलभाषिणी प्रियतमा मे ॥

एवमसम्बन्धोत्तरेऽपि । तृतीयं यथा । वेण्यां
दुर्य्योधनं प्रति गान्धारीवाक्यम् ।
व्याहारो यत् परस्यार्थे हास्यलोभकरं वचः ।
यथा मालविकाग्निमित्रे । लास्यप्रयोगावसाने
मालती निर्गन्तुमिच्छति विदूषकः मा दाव उप-
देशं सुध्वा गमिष्यसि । इत्युपक्रमेण दासः ।
विदूषकं प्रति आर्य्य उच्यतां यस्तया क्रमभेदो
लक्षितः । विदूषकः पढमं । वम्हण पूआभोदि
साइ माए लङ्घिदा मालती समत इत्यादिना ।
नायकस्य विशुद्धनायिकादर्शनप्रयुक्तेन हास-
लोभकारिणा वचसा व्याहारः ॥ * ॥
दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ॥
क्रमेण यथा,—
प्रियजीवितता क्रौर्य्यं निःस्नेहत्वं कृतघ्नता ।
भूयस्तद्दर्शनादेव ममैते गुणतां गताः ॥
तस्यास्तद्रूपसौन्दर्य्यं भूषितं यौवनश्रिया ।
सुखैकायतनं जातं दुःखायैव ममाधुना ॥
एतानि चाङ्गानि नाटकादिषु संभवन्त्यपि
वीथ्यामवश्यं विधेयानि निष्पष्टतया नाटकादिषु
विनिविष्टान्यपि इहोदाहृतानि । वीथी च
नानारसानाञ्चात्र मालारूपतया स्थितत्वाद्-
वीथीयम् । यथा मालविका ।” इति साहित्य-
दर्पणम् ॥ * ॥ * ॥ सूर्य्यगमनपथः । यथा,—
“नागवीथ्युत्तरा वीथी अजवीथ्याच दक्षिणे ।
उभे आषाढ़मूलन्तु अजवीथ्युदयास्त्रयः ॥
अभिजित् पूर्व्वतः स्वाती नागवीथ्युत्तरास्त्रयः ।
अश्विनी कृत्तिका याम्या नागवीथ्युत्तराः स्मृताः ।
रोहिण्यार्द्रा मृगशिरो नागवीथिरिति स्मृता ॥
पुष्याश्लेषापुनर्व्वसोर्वीथिरैरावती स्मृता ।
तिस्रस्तु वीथयो ह्येता उत्तरो मार्ग उच्यते ॥
पूर्व्वा उत्तरफल्गुण्योर्मघाश्चैरावती भवेत् ।
पूर्व्वोत्तरे प्रोष्ठपदे गोवीथी रेवती स्मृता ॥
श्रवणा च धनिष्ठा च वारुणञ्च जरद्गवम् ।
एताश्च वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥
हस्ता चित्रा तथा स्वाती नागवीथिरिति स्मृता ।
विशाखमित्रपैत्र्यञ्च नागवीथिरिहोच्यते ।
मूलपूर्व्वोत्तराषाढ़ा वीथिर्वैश्वानरी तथा ।
स्मृतास्तिस्रस्तु वीथ्यस्ता मार्गे वै दक्षिणे बुधैः ॥”
इति मात्स्ये १०१ अध्यायः ॥ * ॥
अपि च ।
“उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम् ।
पितृयानः स वै पन्था वैश्वानरपथाद्बहिः ।
तत्रासते महात्मान ऋषयो येऽग्निहोत्रिणः ॥”
इति विष्णुपुराणे २ अंशे ८ अध्यायः ॥ * ॥
तत्र ज्योतिश्चक्रे वीथीक्रमो वायुनोक्तः ।
“सर्व्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः ।
स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम् ।
वैश्वानरं दक्षिणतो निर्द्दिष्टमिह तत्त्वतः ॥”
तदेव मध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथि-
त्रयेण त्रिधा भिद्यते । तथा हि त्रिभिस्त्रिभि-
रश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती
चेत्युत्तरमार्गे वीथित्रयम् । आर्षभी गोवीथी

जारद्गवी चेति वैष्णवे मध्यमार्गे वीथित्रयम् ।
अजवीथी मृगवीथी वैश्वानरी चेति दक्षिण-
मार्गे वीथीत्रयम् । तदुक्तं तत्रैव ।
“अश्विनी कृत्तिका याम्या नागवीथीति
शब्दिता ।
रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥
पुष्याश्लेषे तथादित्या वीथी चैरावती स्मृता ।
एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥
तथा द्वे चापि फल्गुण्यौ मघा चैवार्षभी
मता ।
हस्ता चित्रा तथा स्वाती गोवीथीति तु
शब्दिता ॥
ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता ।
एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥
मूलाषाढ़ोत्तराषाढ़ा अजवीथीति शब्दिता ।
श्रवणञ्च धनिष्ठा च मार्गी शतभिषक्तथा ॥
वैश्वानरी भाद्रपदे रेवती चैव कीर्त्तिता ।
एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते ॥”
याम्या भरणी । आदित्या अदितिदेवताका
पुनर्व्वसुः । मार्गी मृगवीथी । एवं स्थिते
अगस्त्यादुत्तरमजवीथ्यास्तु दक्षिणम् । किन्तु
अगस्त्यनिरूढ़वर्त्तिनो वैश्वानरपथाद्बहिर्वैश्वा-
नरवीथीं विहाय मृगवीथीमात्रं पितृयान-
मित्यर्थः । इति तट्टीकायां श्रीधरस्वामी ॥

वीथ्यङ्गः, त्रि, ( वीथ्या अङ्गमिवाङ्गं यस्य । )
नाटकभेदः । इति हेमचन्द्रः ॥ अस्य विवरणं
वीथीशब्दे द्रष्टव्यम् ॥

वीध्रं, क्ली, ( विशेषेण इन्धते दीप्यते इति । वि +
इन्ध + “स्फायितञ्चीति ।” उणा० २ । २६ । इति
रक् ।) नभः । (यथा, अथर्व्ववेदे ।४ । २० । ७।
“वीध्रे सूर्य्यमिव सर्पन्तं मा पिशाचं तिर-
स्करः ॥”)
वायुः । अग्निः । इति संक्षिप्तसारोणादि-
वृत्तिः ॥

वीध्रः, त्रि,(वि + इन्ध + रक् ।) विमलः । इत्यमरः ॥

वीनाहः, पुं, (विशेषेण नह्यते इति । वि + नह +
घञ् । उपसर्गस्य दीर्घः । ) कूपस्य मुखबन्ध-
नम् । इत्यमरः ॥ अस्य कूपस्य यन्मुखबन्धनं
येन मुखं बध्यते तच्च वीनाहः गाब्दीपट्ट इति
ख्यातः । विशेषेण नह्यते कूपमुखमनेन ।
वीनाहः । नह्य ञौ बन्धे घञ् मनीषादित्वात्
वेर्व्वा दीर्घः विनाहः वीनाहः कूपमुखबन्ध-
पट्ट इति स्वामी । इति भरतः ॥

वीपा, स्त्री, विद्युत् । इति शब्दरत्नावली ॥

वीप्सा, स्त्री, क्रियागुणद्रव्यैर्युगपद्व्याप्तुमिच्छा ।
यथा,—
“वृक्षं वृक्षं सिञ्चति” इत्यादि नहि; “मुक्तिर्नर्त्तेऽच्युतोपास्तिं भूतं भूतमभि प्रभुः ।
भक्तो विष्णुमभि प्राज्ञो गोविन्दमभितिष्ठति ॥”
अच्युतोपास्तिं ऋते मुक्तिर्न स्यादित्यर्थः ।
प्रभुरीश्वरः भूतं भूतं अभि सर्व्वप्राणिषु अस्ति
इत्यर्थः । वीप्सायां प्रयुक्तस्य पदस्य द्विर्भावः ।
इति मुग्धबोधटीकायां दुर्गादासः ॥